**केन्द्रीय विद्यालय एन.डी.ए.पुणे**

**अर्धवार्षिक परीक्षा 2018 - 19**

**कक्षा नवमी** **पूर्णाङ्का: अशीति: (80)**

**विषय: संस्कृतम्** **समय: होरात्रयम् (3 hrs)**

## अपठित अवबोधनम्

प्रश्न १- आधुनिके युगे प्रदूषणस्य महती समस्या अस्ति | कुत्रापि स्वच्छ: वायु: , स्वच्छम् जलं, स्वच्छानि खाद्यपदार्थानि न प्राप्यन्ते| यन्त्रालयानां यानानां च धूमेन संपूर्ण वायुमण्डलम् दूषितं सञ्जातम् | दूषित वायुना विविधा श्वास रोगा: जनान् पीडयन्ति | वृक्षाणां विनाशं कृत्वा जना: औद्योगिक क्षेत्राणां विकासं तु कुर्वन्ति किन्तु ते प्रकृतिदेवीमपि संपीडयन्ति | अस्मात् कारणात् एव कुत्रचित् च अनावृष्टिः भवति | अनेन धन जनस्य अपार क्षतिः भवति | अत: अस्माभि: सर्वै: सह मिलित्वा प्रदूषण - समस्याया: समाधानम् कर्तव्यम् |

1 एकपदेन उत्तरत - १/२x२ = १

[क] आधुनिके युगे कस्य महती समस्या अस्ति ?

[ख] केन श्वासरोगा: भवन्ति ?

2 पूर्णवाक्येन उत्तरत - १x२ = २

[क] सम्पूर्ण वायुमण्डलं केन दूषितं सञ्जातम् ?

[ख] जना: प्रकृतिदेवींकथं संपीडयन्ति ?

3 निर्देशानुसारं उत्तरत - १/२x४ = २

[क] 'हानि:' इत्यर्थे गद्यान्शे किं पदम् लिखितम् ?

(१) विनाशं (२) क्षतिः (3) वृष्टि:

[ख] 'समस्या' इति विशेष्य - पदस्य कृते किम् विशेषण पदम् प्रयुक्तम् ?

[ग] 'कुर्वन्ति' इति क्रियापदस्यकृते कर्तृपदं किम्?

(१) विनाशं (२) वृक्षाणां (3) जना:

[घ] 'प्राप्यन्ते' अस्मिन् पदे क: उपसर्ग: ?

(१) प्र (२) प्राप् (३) आप्

## खण्ड ख - रचनात्मक कार्यम्

प्रश्न - २:- स्वजन्मदिवसे मित्रं प्रति लिखितं पत्रं मञ्जूषायां प्रदत्तपदैः पूरयत- ( १/२x१०=५)

(1 )-------------------------------
दिल्लीनगरम्

प्रियमित्र राघव ,

मधुरस्मृतयः,

अत्र कुशलं तत्रास्तु | भवान् इदं ( 2 ) ----------------- अत्यधिकं हर्षित : भविष्यति यत् मम ( 3 ) ---------------- आगामि रविवासरे भविष्यति | प्रतिवर्षमिव मम जनकेन लघु समारोहस्य( 4 ) ---------------- पूजाया: कार्यक्रम: ( 5 ) ------------------ भविष्यति | सर्वाणि अपि मम ( 6 ) ----------------- आगमिष्यन्ति | तुभ्यम् अपि ( 7 ) --------------- प्रेषयामि | अतएव समये आगत्य ( 8 )--------------- शोभाम् ( 9 ) ----------------------|

तव अभिन्नं मित्रम्

( 10 ) ----------------------

मञ्जूषा :- [ वर्धस्व , जन्मदिवस: , ज्ञात्वा , परीक्षाभवनात् , आयोजनम् , पञ्चवादने ,

मित्राणि , निमन्त्रणम् , दिनेश: , समारोहस्य ]

प्रश्न 3 - मञ्जूषायां प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पञ्चवाक्यानि संस्कृतेन लिखत -

[ 1 x 5 = 5 ]

| |
|---|
| मञ्जूषा - रेलस्थानकं, जना:, रेलयानं, भ्रमन्ति, आरोहन्ति, भारं, महिला:, स्तंभ:, दृश्यं, भारवाहक:, निवहति, जनसम्मर्द:, आयाति, आगच्छति, वार्तालापं, आपणिक:, विक्रीणाति |



प्रश्न ४ - अधोलिखितवाक्यानां संस्कृतेन अनुवादं कुरुत - [ 1 x 5 =5 ]

१ - छात्र पढने के लिए विद्यालय जाते हैं |

२ - सीता राम की पत्नी थी |

३ -पर्यावरण की रक्षा हम सब का परम कर्तव्य है |

४ - माता पुत्र को फ़ल देती है |

५ - भारत के उत्तर दिशा में हिमालय है |

अनुप्रयुक्तव्याकरणम्

प्रश्न ५- वर्णसंयोजनं कृत्वा पदरचनां कुरु - १/२x२ = १

[क] (१) ज्+इ+ह्+व्+आ = ----------------------------

(२) गणितम् = ग्+अ+ ----------- + इ + त्+अ+म् |

[ख] (१) 'व्' वर्णस्य उच्चारणस्थानं किम् ? १x२ = २

(२) 'फ़लेभ्य: अस्मिन् पदे ओष्ठ्य वर्ण: क: ?

प्रश्न ६ अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां संधिं विच्छेदं वा विकल्पेभ्य: चित्वा लिखत - १x५=५

[१] **<u>नैतादृश:</u>** पूर्वं दृष्ट: |

(क) न + एतादृश: (ख) न् + एतादृश: (ग) नै + तादृश: (घ) नै + एतादृश:

[२] सा **<u>तत्रोपस्थिता</u>** |

(क) तत्रो + पस्थिता (ख) तत्र + उपस्थिता (ग) तत्रोप + स्थिता (घ) तत्रा + उपस्थिता

[3] **<u>लसन्तीह</u>** सरसा रसाला: |

(क) लसन्ती + इह (ख) लसन्ति + इह (ग) लसन् + तीह (घ) लसन्ति + ह

[४] **<u>मयैतत्</u>** न |

(क) मया + एतत् (ख) मयै + तत् (ग) मया + तत् (घ) मय + एतत्

[५] कोऽयं **<u>कलहाडम्बर:</u>** ?

(क) कलहा + डम्बर: (ख) कलह + अडम्बर:(ग) कल + हाडम्बर: (घ) कलह + आडम्बर:

प्रश्न ७ प्रदत्त विकल्पेभ्य: उचितंशब्दरूपं चित्वा वाक्यपूर्ति: क्रियताम् |

[१] इयं --------------- गुणवती अस्ति |

(क) कन्या (ख) कन्यै (ग) कन्या: (घ) कन्यायाः

[२] मम पिता ------------- कार्यं करोति |

(क) कार्यालये (ख) कार्यालयम् (ग) कार्यालयेन (घ) कार्यालयौ

[३] सिहा: -------------- गर्जन्ति |

(क) वनस्य (ख) वनाय (ग) वनानि (घ) वने

[४] ---------------- आज्ञा पालनीया |

(क) गुरूणाम् (ख) गुरवे (ग) गुरुषु (घ) गुरव:

(५) ----------------- किम् नाम ?

(क) त्वं (ख) तवस्य (ग) तव (घ) यूयम्

प्रश्न ८ समुचित धातुरूपै: रिक्तस्थानानि पूरयत

(१) बालकः उद्दतस्वभाव: ------------------------- | १x३ = ३

(क)अभवन् (ख) अभवत् (ग) अभवत (घ) अभवताम्

(२) ग्रामे निर्धना: नार्य: ------------------------- |

(क)अस्ति (ख) स्त: (ग) सन्ति (घ) आसीत्

(३) छात्रौ अवधानेन --------------------------- |

(क)पठत: (ख) पठन्ति (ग) पठति (घ) पठामि

प्रश्न ९ उचित विभक्तियुक्तपदं चित्वा रिक्तस्थानानि पूरयत - १x४ = ४

[१] चिकित्सक: --------------------------- उपचरति |

(क) रूग्णान् (ख) रूग्णेभ्य: (ग) रूग्णात् (घ) रूग्णस्य

[२] रूग्ण: ---------------------------- प्रति कथयति |

(क) चिकित्सक: (ख) चिकित्सकेन (ग) चिकित्सकाय (घ) चिकित्सकं

[3] चिकित्सक: रूग्णस्य ----------------------- सह वार्तालापं करोति |

(क) परिजनेन (ख) परिजनाय (ग) परिजनस्य (घ) परिजनम्

[४] नम: एतादृशेभ्य: ------------------------- |

(क) चिकित्सकेभ्य: (ख) चिकित्सकान् (ग) चिकित्सकेन

प्रश्न १० प्रत्ययस्य योगं विभागं वा कृत्वा लिखत - १x३ = ३

[१] माता तण्डुलान् **निक्षिप्य** अकथयत् -

(क) नि + क्षिप् + यत् (ख) नि + क्षिप् + ल्यप्

(ग) नि + क्षिप् + अक् (घ) नि + क्षिप् + क्त्वा

[२] चित्र विचित्र वस्तूनि **दृष्ट्वा** सा विस्मिता |

(क) दृश् + क्त्वा (ख) दृश् + त्वा (ग) दृश् + क्त (घ) दृश् + वा

[3] अहं देव दर्शनं -------------- (कृ + तुमुन्) इच्छामि |

(क) क्रेतुम्  (ख) कृतम्  (ग) कृत्वा (घ) कर्तुम्

प्रश्न ११ अधोलिखित पदेषु उपसर्गं चित्वा लिखत - १/२x४ = २

[१] दुहिता **विनम्रा** आसीत् |

(क) विन  (ख) वि  (ग) आ  (घ) व

[२] गृहम् **आगत्य** सा हर्षिता |

(क) आ  (ख) गम्  (ग) अ  (घ) मा

[3] सा **प्रहर्षिता** जाता |

(क) प्रह  (ख) प्रहर  (ग) प्र  (घ) ता

[४] बालिका **निर्धना** आसीत् |

(क) नि  (ख) निर्  (ग) निध  (घ) ना

## पठित - अवबोधनम्

प्रश्न १२ अधोलिखितं गद्यान्शं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत -

अस्ति हिमवान् नाम सर्वरत्नभूमिर्नगेन्द्र: | तस्य सानोरुपरि विभाति कञ्चनपुरं नाम नगरम् | तत्र जीमूतकेतुरिति श्रीमान् विद्याधरपति: वसति स्म | तस्य गृहोद्याने कुलक्रमागत: कल्पतरु: स्थित: | स राजा जीमूतकेतु: तं कल्पतरुम् आराध्य तत्प्रसादात् च बोधिसत्वांशसम्भवं जीमूतवाहनं नाम पुत्रं प्राप्नोत् | स महान् दानवीर: सर्वभूतानुकम्पी च अभवत् |

[१] एकपदेन उत्तरत - १x२ = २

(क) क: नाम नगेन्द्र: अस्ति ?

(ख) तत्र किम् नाम नगरम् विभाति ?

[२] पूर्णवाक्येन उत्तरत - १x२ = २

(क) विद्याधरपते: नाम किम् ?

(ख) जीमूतवाहनः कीदृश: अभवत् ?

[३] भाषिक कार्यम् - १/२x४ = २

(क) ‘पर्वतराज:’ इत्यर्थे गद्यांशे किम् पदं प्रयुक्तम् ?

(१) कल्पतरु: (२) नगरम् (३) नगेन्द्र: (४) बोधिसत्व:

(ख) ‘श्रीमती’ इत्यस्य क: विपर्यय: गद्यांशे प्रयुक्त: ?

(१) पुत्र: (२) श्रीमान् (३) दानवीर: (४) महान्

(ग) ‘सर्वरत्नभूमि: नगेन्द्र:’ अनयो: पदयो: विशेषणपदं किम् ?

(१) सर्वरत्नभूमि: (२) नगेन्द्र: (३) रत्न: (४) भूमि:

(घ) अस्ति हिमवान् नाम सर्वरत्नभूमि: नगेन्द्र: |’ अस्मिन्वाक्ये क्रियापदं किम् अस्ति ?

प्रश्न १३- अधोलिखितं पद्यान्शं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत -

निनादय नवीनामये वाणि! वीणाम्
मृदुंगाय गीतिं ललित-नीति-लीनाम् |
मधुर- मञ्जरी-पिञ्जरी-भूत-माला:
वसन्ते लसन्तीह सरसा रसाला:
कलापा: ललित- कोकिला- काकलीनाम् |

[१] एकपदेन उत्तरत - १x२ = २

(क) केषां कलापा: लसन्ति ?

(ख) सरसा रसाला: कदा लसन्ति ?

[२] पूर्णवाक्येन उत्तरत - १x२ = २

(क) कवि कां वीणां निनादयितुं कथयति ?

(ख) वाणि कीदृशीं गीतिं गायतु ?

[३] भाषिक कार्यम् - १/२x४ = २

(क) 'आम्रकुसुमं' इत्यर्थे पद्यांशे किम् पदं प्रयुक्तम् ?

(१) मधुरम् (२) मञ्जरी (३) रसाला: (४) कलापा:

(ख) 'वसन्ते लसन्तीह सरसा रसाला:' अस्मिन्वाक्ये क्रियापदं किम् अस्ति ?

(१) वसन्ते (२) इह (३) सरसा (४) लसन्ति

(ग) 'सरसा रसाला:' अनयो: पदयो: विशेष्यपदं किम् ?

(१) सर्वरत्नभूमि: (२) नगेन्द्र: (३) रत्न: (४) भूमि:

(घ) पद्यान्शात् एकम् अव्ययपदं चित्वा लिखत |

प्रश्न १४- अधोलिखितं नाट्यान्शं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत -

[ तत: प्रविशति करतलाभ्यां चक्षुषी मार्जयन्ति पञ्चवर्षदेशीया बालिका सोमप्रभा ]

विमला - अये जागरिता ! त्वरस्व तावत् | परिहीयते विद्यालय गमन वेला |

सोमप्रभा - अम्ब! अद्य ण गमिष्यामि विद्यालयम् |

विमला - [हस्तेन सोमप्रभां गृहीत्वा] अये! किमेतत् कथयसि | विद्यालयस्तु गन्तव्य एव प्रतिदिनम् | [ सोमप्रभाया: प्रस्थानम् ]

श्वश्रू:- विमले! अयि दुष्टे ! कुत्र मृतासि ? कियता: कालात् शब्दापयामि ?

विमला- [ सकरूणम् निशम्य ] इयं मम श्वश्रूः सदैव मर्मघातिभि: कटुवचनैराक्षिपति माम् |

[१] एकपदेन उत्तरत - १x२ = २

(क) का परिहीयते ?

(ख) सोमप्रभा कतिवर्षीया अस्ति ?

[२] पूर्णवाक्येन उत्तरत - १x२ = २

(क) श्वश्रूः कीदृशै: वचनै: विमलां आक्षिपति ?

(ख) प्रतिदिनम् कुत्र गन्तव्य एव ?

[३] भाषिक कार्यम् - १/२x४ = २

(क) 'शीघ्रतां कुरु ' इत्यर्थे नाट्यान्शे किम् पदं प्रयुक्तम् ?

(१) परिहीयते (२) आक्षिपति (३) घातिभि:: (४) त्वरस्व

(ख) 'जीवितासि' इत्यस्य क: विपर्यय: अत्र प्रयुक्त: ?

(१) जागरिता (२) मृतासि (३) कथयसि (४) गमिष्यामि

(ग) 'परिहीयते विद्यालयगमनवेला' अत्र क्रियापदं किम् ?

(१) परिहीयते (२) विद्यालय (३) गमन (४) वेला

(घ) ' इयं मम श्वश्रू:सदैव .... |' अस्मिन्वाक्ये 'मम' इति सर्वनाम पदं कस्मै प्रयुक्तम् ?

(१) सोमप्रभायै (२) श्वश्र्वे (३) विमलायै (४) न क: अपि |

प्रश्न -15 - रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणम् कुरुत - [१x ५ =५ ]

क- कालिन्दात्मजाया: तीरे समीर: वहति |

ख- गुणेषु पुरुषै: प्रयन्त: कर्तव्य: |

ग- खलानां मैत्री आरम्भगुर्वी भवति |

घ- वृक्षाः फलम् न खादन्ति |

ङ- ग्रामात् बहिः पिप्पलवृक्ष: आसीत् |

प्रश्न -16 - अधोलिखितानां श्लोकानां अन्वयेषु मन्जूषातः समुचितपदेन रिक्तपूर्तिं कुरुत - [१/२ x ८ =४ ]

क- गुणा गुणज्ञेषु गुणा: भवन्ति ,

ते निर्गुणं प्राप्य भवन्ति दोषाः |

सुस्वादुतोया: प्रवहन्ति नद्य:,

समुद्रमासाद्य भवन्त्यपेया: ||

अन्वयः - गुणज्ञेषु गुणाः १ - -------- भवन्ति , ते २------------- प्राप्य दोषाः भवन्ति |

सुस्वादुतोया: 3---------------- प्रवहन्ति , समुद्रं ४ --------------- अपेयाः भवन्ति |

ख - प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तव: |

तस्मात् तदेव वक्तव्यं वचने का दरिद्रता ||

अन्वयः - प्रियवाक्यप्रदानेन १- ------------ जन्तव: २--------------- | तस्मात् तत् एव

३ ------------- वचने का ४------------------------|

मन्जूषा - [ नद्यः , गुणाः ,निर्गुणम् , आसाद्य , तुष्यन्ति , सर्वे , दरिद्रता , वक्तव्यम् ]

अथवा

अधोलिखितस्य श्लोकस्य भावार्थं मञ्जूषात: उचितपदानि चित्वा पूरयत -[ १ x ४=४ ]

श्लोक: - वृत्तं यत्नेन संरक्षेद वित्तमेति च याति च |

अक्षीणो वित्तत: क्षीणो वृत्ततस्तु हतो हत: ||

भावार्थ: - अस्य भाव: अस्ति यत् मनुष्यै: १ ------------ यत्नेन संरक्षणीयं यत: २ ---------------- तु आयाति ३ --------------- वा | धनेन क्षीण: अक्षीण; परम् ४ ------------- क्षीण: नूनम् नश्यति

|

मञ्जूषा : [ धनम् , चरित्रम् , चारित्रेण , याति ]

प्रश्न 17 - अधोलिखितानि वाक्यानि कथाक्रमेण संयोज्य लिखत- [ १/२ x ८ = ४ ]

क - युवयो: उपचारं अहम् करिष्ये |

ख - महत: सङ्कटात् त्वं माम् उद्धृतवती |

ग -अत्र आगत्य मया दृष्टम् यत् पितामह: पितामही च त्वां मारयत: |

घ - पुरुषनिरीक्षेण सह सोमप्रभा प्रविशति |

च - श्वशुर: श्वश्रूः च सक्रौर्यं सहिंस्रभावं विमलाम् निभालयन्तौ तां उपसर्पत: |

छ - विमला आत्मत्राणाय सप्राणपणम् ययतते |

ज - तव पिता यावन्तं यौतकराशिम् प्रतिज्ञातवान् तावत: अर्धमेव समर्पितवान् |

झ - इयं मम श्वश्रूः सदैव मर्मघातिभि: कटुवचनै: अक्षिपति |

प्रश्न १८ - (अ) प्रसङ्गानुसारं रेखाङ्कितपदयो: उचितं अर्थं चित्वा लिखत -[ १ x २ =२ ]

१ - <u>तन्द्रालु</u>: बाल: उद्यानम् प्रविशति |

क - अलस: ख- सरल: ग - सुन्दर: घ- उत्तम:

२ - को$पि <u>वयस्येषु</u> उपलभ्यमान: न आसीत् |

क- मित्रेषु ख- बालकेषु ग- खगेषु घ- चटकासु

(ब)प्रसङ्गानुसारं रेखाङ्कितपदयो: उचितं विलोमपदं चित्वा लिखत -[ १x२=२ ]

१ - बालिकया **<u>पूर्वम्</u>** किं न दृष्टम् आसीत् |

क- प्राग् ख- पश्चात् ग- प्रति घ-परम्

२ - **<u>रुदन्तीं</u>** बालिकां काक: कथम् आश्वासयत् |

क- उपरि ख- हसन्तीं ग- उक्तम् घ- लुब्धा

============================================================